# ॥ श्रीगिरिराजधार्यष्टकम् ॥

.. shrIgirirAjadhAryaShTakam ..

sanskritdocuments.org

August 20, 2017

# .. shrIgirirAjadhAryaShTakam ..

# ॥ श्रीगिरिराजधार्यष्टकम् ॥

## Sanskrit Document Information

Text title : girirAjadhAryaShTakam

File name : girirAjadhAryaShTakam.itx

Category : aShTaka, vishhnu, krishna

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ श्रीगिरिराजधार्यष्टकम् ॥

भक्ताभिलाषाचरितानुसारी दुग्धादिचौर्येण यशोविसारी ।
कुमारतानन्दितघोषनारी मम प्रभुः श्रीगिरिराजधारी ॥ १॥

व्रजाङ्गनावृन्दसदाविहारी अङ्गैर्गृहाङ्गारतमोऽपहारी ।
क्रीडारसावेशतमोऽभिसारी मम प्रभुः श्रीगिरिराजधारी ॥ २॥

वेणुस्वनानन्दितपन्नगारी रसातलानृत्यपदप्रचारी ।
क्रीडन्वयस्याकृतिदैत्यमारी मम प्रभुः श्रीगिरिराजधारी ॥ ३॥

पुलिन्ददाराहितशम्बरारी रमासदोदारदयाप्रकारी ।
गोवर्धने कन्दफलोपहारी मम प्रभुः श्रीगिरिराजधारी ॥ ४॥

कलिन्दजाकूलदुकूलहारी कुमारिकाकामकलावितारी ।
वृन्दावने गोधनवृन्दचारी मम प्रभुः श्रीगिरिराजधारी ॥ ५॥

व्रजेन्द्रसर्वाधिकशर्मकारी महेन्द्रगर्वाधिकगर्वहारी ।
वृन्दावने कन्दफलोपहारी मम प्रभुः श्रीगिरिराजधारी ॥ ६॥

मनःकलानाथतमोविदारी वंशीरवाकारिततत्कुमारिः ।
रासोत्सवोद्वेल्लरसाब्धिमारी मम प्रभुः श्रीगिरिराजधारी ॥ ७॥

मत्तद्विपोद्दामगतानुकारी लुठत्प्रसूनाप्रपदीनहारी ।
रामोरसस्पर्शकरप्रसारी मम प्रभुः श्रीगिरिराजधारी ॥ ८॥

इति श्रीमद्वल्लभाचार्यविरचितं श्रीगिरिराजधार्यष्टकं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIgirirAjadhAryaShTakam ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*